# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (०१)

१५.१०.२०१२

# स्त्रीप्रत्ययाः

- स्त्रीप्रत्ययाः = स्त्रीत्वबोधकाः प्रत्ययाः ।
- आकारान्ताः - टाप्, डाप्, चाप् । अजा, सीमा, सूर्या ।
- ईकारान्ताः - ङीप्, ङीष्, ङीन् । कर्त्री, गौरी, शार्ङ्गरवी ।
- ऊकारान्तः - ऊङ् । श्वश्रूः ।
- तिः । युवतिः ।

- अन्ये केचन कृत्प्रत्ययाः सन्ति, यदन्ताः स्त्रीलिङ्गे एव भवन्ति - उदा: क्तिन् - कृतिः, मतिः... ।
- किन्तु एते प्रत्ययाः स्त्रीप्रत्ययेषु नान्तर्भवन्ति ।
- प्रायेण, पुंलिङ्गे विद्यमानेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वबोधनार्थं ये प्रत्ययाः योज्यन्ते, ते एव स्त्रीप्रत्ययाः ।

# ४५३.स्त्रियाम् (४.१.३)

- एकपदात्मकं सूत्रम् ।
- अधिकारोऽयम् ।
- समर्थानामिति यावत् ।
- ‘समर्थानां प्रथमाद्वा’ (४.१.८२)
- समर्थैति ।

# ४५४. अजाद्यतष्टाप् (४.१.४)

- पदद्वयम् । अजादि-अतः, टाप् ।
- 'ङ्याप्प्रातिपदिकात्' (४.१.१) इति, 'स्त्रियाम्' (४.१.३) इति च अधिक्रियेते ।
- अजादीनाम् अकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात् ।
- अजाद्युक्तिः ङीषो ङीपश्च बाधनाय ।
- अदन्तटाबपवादौ ङीप्-ङीषौ, तयोरप्यपवादः अजादिगणे पाठः ।

- अज टाप्    (‘अजाद्यतष्टाप्’ - ४.१.४)
- अज आ    (‘चुटू’ - १.३.७, ‘हलन्त्यम्’ - १.३.३, ‘तस्य लोपः’ - १.३.९)
- अजा    (‘अकः सवर्णे दीर्घः’ - ६.१.१०१)
- ‘प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्’ इति परिभाषया प्रातिपदिकत्वम् ।

- अतः, खट्वा ।
- खट्वेति ।